"विवस्वानिव तेजोभिर्नभस्वानिव वेगतः ।
राजा चरैर्जगत् सर्व्वं प्राप्नुयाल्लोकसम्मतेः ॥
तर्केङ्गितज्ञः स्मृतिमान् स्वीयभावाप्रकाशकः ।
क्लेशायाससहो दक्षः सर्व्वत्र भयवर्जितः ॥
सुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान् ।
द्वयो निहन्याचारेण परराष्ट्रं विचक्षणः ॥
कालज्ञो मन्त्रकुशलान् संवत्सरचिकित्सकान् ।
तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः ॥
अकुलांश्च तथालुब्धान् दृष्टार्थान् सत्यभाषिणः ।
पाषण्डिगतापसादीन् परराष्ट्रे नियोजयेत् ॥
स्वदेशपरदेशज्ञान् सुशीलान् सुविचक्षणान् ।
नानाद्देशान् बहूंश्चैव चराणां विनियोजयेत् ॥
नैकस्य वचने राजा चारस्य प्रत्ययं वहेत् ।
द्वयोः समक्षमाज्ञाय तद्युक्तं कार्य्यमारभेत् ॥
तस्माद्राजा प्रयुञ्जीत चरान् बहुसुखान् बहून् ।
नीरेतोवामनाः कुब्जास्त्विद्या ये च कारवः ॥
भिक्षुक्यश्चारणा दास्यो मालाकार्य्यः कलाविदः ।
अन्तःपुरगतां वार्त्तां निर्हरेयुरलक्षिताम् ॥
प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधो मतः ।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूतसंज्ञकः ॥"
इति भोजराजकृतयुक्तिकल्पतरुः ॥ * ॥
अक्षद्यूतभेदः । भौमः । चलः । इति मेदिनी । रे, ३० ॥ खञ्जनपक्षी । इति शब्दमाला ॥ कपर्द्दकः । इति राजनिर्घण्टः ॥ मेषकर्कटतुलामकरलग्नानि । इति ज्योतिषम् ॥ अस्थिरविभूतिमिश्रं चलमटनं स्खलितनियममपि चरमे । इति दीपिका ॥ (यथा, तिथितत्त्वे ।
"चरलग्ने चरांशे वा स्थापनञ्च विसर्ज्जनम् ॥"
जङ्गमे, त्रि । यथा मनुः । ७ । १५ ।
"तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ॥"
तथाच चरके सूत्रस्थाने २७ अध्याये ।
"चरः शरीरावयवाः स्वभावो धातवः क्रिया ।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते ॥
चरोऽनूपजलाकाशधन्वाद्यो भक्षसंविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः ॥")
चरकः, पुं, (चर एव । स्वार्थे कन् ।) चारः । इत्युणादिकोषः ॥ पर्पटः । इति राजनिर्घण्टः ॥ (चरति गच्छति वेत्ति वेदवेद्यकादीनि सर्व्वशास्त्राणीति । चर + अच् ततः कन् च । यद्वा चर इव महीतलं द्रष्टुमागतः । चर + इवार्थे कन् ।) मुनिविशेषः । तत्कृततन्नामकग्रन्थः । तयोरुत्पत्तिर्यथा,—
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान् ।
एकदा स महीवृत्तं द्रष्टुं चर इवागतः ॥
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीड़ितान् ।
स्थलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥
संचिन्त्य स स्वयं तत्र मुनेः पुत्त्रो बभूव ह ।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले ।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि ॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ॥
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् ।
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ॥
चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः ॥"
इति भावप्रकाशः ॥
चरटः, पुं, (चरति नृत्यतीव विचरतीत्यर्थः । चर + बाहुलकात् अटच् ।) खञ्जनपक्षी । इति शब्दमाला ॥
चरणं, क्ली, (चर + भावे ल्युट् ।) गमनम् । (यथा, ऋग्वेदे । ९ । ११३ । ९ ।
"यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ॥")
भक्षणम् । (यथा, मनुः । २ । १८६ ।
"आहृत्य भैक्षचरणमसमिन्धं च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत् ॥")
आचारः । इति हेमचन्द्रः । ३ । ५०७ ॥ (यथा, ऋग्वेदे । १० । १३६ । ६ ।
"अप्सरसां गन्धर्व्वाणां मृगाणां चरणे चरन् ॥")
चरणः, पुं क्ली, बहूचादिः । (यथा, प्रश्नतत्त्वे ।४।३।
"न एकचरणं गोत्रं न च विद्यां कुलं न च ।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥"
अपि च महाभाष्यवचनम् । यथा,—
"सङ्ख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥"
"चरणशब्दो वेदैकदेशवाची कठादिरूपः ।"इति मुग्धबोधटीकायां दुर्गादासः ॥) मूलम् । गोत्रम् । इति मेदिनी । णे, ३७ ॥ (चरतीति । चर + ल्युः । चरत्यनेनेति करणे ल्युट् वा ।) अधमाङ्गम् । तत्पर्य्यायः । पादः २ पत् ३ अङ्घ्रिः ४ । इत्यमरः । २ । ६ । ७१ ॥ विक्रमः ५ पदः ६ आक्रमः ७ । इति राजनिर्घण्टः ॥ क्रमणः ८ चलनः ९ क्रमः १० । इति हेमचन्द्रः । ३।२८०॥ पदम् ११ पात् १२ । इति जटाधरः ॥ (यथा, मनुः । ८ । २७१ ।
"अङ्गुलीर्ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे ।
द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥"
श्लोकचतुर्थभागः । यथा, छन्दोरत्नाकरे १ अध्याये ।
"शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥")
चरणग्रन्थिः, पुं, (चरणस्य ग्रन्थिः ।) गुल्फः । इति हेमचन्द्रः । ३ । ६१५ ॥
चरणव्यूहं, क्ली, (चरणानां वेदशाखानां व्यूहोऽत्र ।) वेदव्यासविरचितचतुर्व्वेदविवरणशास्त्रम् । तत्तु वेदशब्दे द्रष्टव्यम् ॥
चरणायुधः, पुं, (चरण एवायुधं अस्त्रविशेषो यस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (पर्य्यायोऽस्य यथा,—
"कुक्कुटः कृकवाकुः स्यात् कलयश्चरणायुधः ।
ताम्रचूड़स्तथा दक्षो यामनादी शिखण्डिकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य मांसगुणादिकं कुक्कुटशब्दे द्रष्टव्यम् ॥ चरणाख्ये, त्रि । यथा, रामायणे ।३।५६।३५।
"तुण्डपक्षप्रहारैश्च जटायुश्चरणायुधः ॥")
चरमः, त्रि, (चरतीति । "चरेश्च ।" उणा ५ । ६८ । इति अमच् ।) अन्त्यः । पश्चिमः । इत्युणादिकोषः ॥ (यथा, मनुः । २ । १६४ ।
"उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥")
चरमक्ष्माभृत्, पुं, (क्ष्मां बिभर्त्तीति । भृ + क्विप् । ततः चरमश्चासौ क्ष्माभृच्चेति कर्म्मधारयः ।) अस्ताचलः । इत्यमरः । २ । ३ ।२ ॥
चरमाचलः, पुं, (न चलतीति पचाद्यच् अचलः पर्व्वतः । ततः चरमश्चासौ अचलश्चेति कर्म्मधारयः ।) अस्तपर्व्वतः । इति त्रिकाण्डशेषः ॥
चरमाद्रिः, पुं, (चरमश्चासावद्रिश्चेति ।) अस्ताचलः । इति हेमचन्द्रः ॥
चराचरं, क्ली, (चराचरयोः समाहारः ।) जगत् । इति मेदिनी । रे,२६०॥ (तथा च मनुः ।१।५७।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम् ।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥")
आकाशः । इति धरणी ॥ जङ्गमाजङ्गमम् । यथा, देवीमाहात्म्ये ।
"तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥"
चराचरः, त्रि, (चरश्चलं आचरो व्यवहारचेष्टादिकं तौ विद्येतेऽस्मिन् ।) जङ्गमः । इत्यमरः । ३ । १ । ७४ ॥ क्षुद्रः । इति विश्वः ॥ दृढः । इति हेमचन्द्रः ॥ कपर्द्दके पुं । इति राजनिर्घण्टः ॥ (चरतीति चरो जङ्गमः अचरः स्थावरः । चरेण सह अचरः । स्थावरजङ्गमः । यथा, भागवते । ३ । ६ । ६ ।
"सुप्तोभाग्योन्यमासाद्य यस्मिँल्लोकाश्चराचराः ॥")
चरिः,पुं,(चर + "सर्व्वधातुभ्य इन् ।"उणा ४।११७। इति इन् ।) पशुः । इत्युणादिकोषः ॥
चरितं, क्ली, (चर + भावे क्तः ।) चरित्रम् । इति शब्दरत्नावली ॥ (यथा, भागवते।१०।१।१।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः ।
राज्ञाञ्चोभयवंश्यानां चरितं परमाद्भुतम् ॥")
तद्द्विविधं यथा, उज्ज्वलनीलमणौ ।
"अनुभावाश्च लीला चेत्युच्यते चरितं द्विधा ।
अनुभावा अलङ्काराख्याः उद्भास्वराख्याः वाचिकाख्याश्च । लीला स्याच्चारुविक्रीड़ा रासकन्दुकखेलाद्या चारुक्रीड़ा प्रकीर्त्तिता । ताण्डवं वेणुवादनं गोदोहः पर्व्वतोद्धारो गोहूतिर्गमनादिका ॥" (यथा, गीतगोविन्दे । १ । २ ।
"वाग्देवताचरितचित्रितचित्तसद्मा ॥"
वाच्यलिङ्गे तु ।चर + कर्म्मणि क्तः ।) कृतम् । आचरितम् । यथा, रामायणे । १ । ३ । १ ।
"श्रुत्वा पूर्व्वं काव्यबीजं देवर्षेर्नारदात्ततः ।
लोकादन्विष्य भूयश्च चरितं चरितव्रतः ॥")
चरितार्थः, त्रि, (चरितः कृतः अर्थः प्रयोजनं येन सः ।) प्राप्तप्रयोजनः । यथा, कुमारसम्भवे । २ । ७ ।
"पुराणस्य कवेस्तस्य चतुर्म्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥"